Printed by
J. N. BANERJEE & SON, BANERJEE PRESS,
119, Old Boytakhana Bazar Road,
Calcutta.

1899

उत्सर्गपत्रम् ।

भक्तेन दत्तमसुरभि
धुस्तूरकुसुममपि सादरन्लब्धम् ।
शशिभूषणोऽपि तुष्यति
कृत्वाशुतोषनाम यथार्थम् ॥

तत्साहसेन देव
निर्गन्धकुन्दकुसुमाञ्जलिमाहृतम् ।
गृहाण शशिभूषण ! मे
निर्वृतये निर्व्वाणकाव्यम् ॥

प्रणत
श्रीमहेन्द्रस्य ।

शुद्धिपत्रम् ।

पृष्ठा	पंक्तिः	अशुद्धम्	शुद्धम्
१–७	२–६, ७	परिच्छेदः	सर्गः
३	६	समाहूतः	आमन्त्रितः
१४	३	सीता	रमा
१४	१३	विधित्सया	विधित्सयन्
२२	१२	अगम्या	अगम्यं
३२	१	वड़वेन	बड़वाग्नि
३५	८	कजन्ति	हिमन्ति
३८	८	ददन्त्यौ	ददत्यौ
३९	१०–१४	अमीषां	अमूषां
४०	५	”	”
४०	७	ग्रर	अर
४१	१३	निवारितुं	निरासितुं
५१	७	संयुत	संस्तुत
५७	६	रवगाहते	ववगाहते
६३	१	तमेव	त्वमेव
६८	११	विषयाणि	विषयान्वि
९१	१५	मसृजा	मसृतः

भूदेव निर्व्वाणम् ।

काव्यम् ।

प्रथम: परिच्छेद: ।

स्फुरति तपनतेज: प्रत्यक्षं भू-तमिस्रम्
प्रभवति किमु हन्तुं ध्वान्तमन्त: कदापि ।
हृदय-भुवनलीनं क्षालयद्ध्वान्तकाण्डं
जयति जगति नित्यं ब्रह्मतेजस्तदेव ॥ १ ॥

निशान्तबोधादपहाय मन्दिरं
जगत्-प्रसन्नानन-वीक्षणेच्छया ।
त्वरापरस्य व्यथते कथं मन:
समागत-प्राय-वियोग-विह्वलम् ॥ ॥

कथं समीक्षे प्रकृतिं विषादिनी-
मनारतं नेत्रजलेन विप्लुताम् ।
खरांशु-सन्तान-गृहीत-सन्ततिं
भृशं रुदन्तीं कृपणाङ्गनामिव ॥ ३ ॥

तदेव फुल्लं कुसुमं विराजते
स एव मन्दः पवनोऽभिवर्त्तते ।
त एव भृङ्गा मधुरं रुवन्ति च
तथापि विघ्नेव विभाति भारती* ॥ ४ ॥

किमद्य धाता कठिनं विधित्सति
तथा प्रबोधातिविषण्णमानसम् ।
विषादवार्त्ता-स्फुरणातिदारुणो
विषादयन् वाचमिमां ब्रवीतिकिम् ॥ ५ ॥

निशार्द्धशेषे परिशान्तकल्मषे
प्रशान्तभावं समुपागते भवे ।
विहाय भूदेव-विधुर्निराश्रयान्
स्वबान्धवाञ्छोक विशेष-कातरान् ॥ ६ ॥

* भारतभूमिरित्यर्थः ।

सुधांशुरश्मिच्छुरिताम्बुसञ्चयं
तरङ्गलोलांशुकसंवृतं सुखम्।
अशेष-पापाहत-जीवदुःसह—
कृतान्तभीतिप्रशमं हि जाह्नवम् ॥ ७ ॥

समीर-सम्पर्क-समुत्थ-निस्वनैः
समाहुतः खेलननिस्पृहो मुदा।
निजाम्बिकास्नेहमयैस्तु भाषितैः
पिपासुसन्तान इवाङ्कमागतः ॥ ८ ॥ *

निशापतिर्विम्ब-विशेष-गौरवं
निरीक्ष्य नाकोऽसुखमञ्जुलोचनः।
शुचातिसन्तप्तमिवात्मविग्रहं
निमज्जयामास हि पश्चिमाम्बुधौ ॥ ९ ॥

जगत्प्रसूतिस्तिमिरावगुण्ठन-
हृताननना पुत्र-वियोग-पीड़िता।
असह्यशोकाजव-रुद्धभारती
हिमाम्बु-सम्पात कृतानुशोचना ॥ १० ॥

* इति विभिर्गुणवती।

विहङ्गझङ्कारमयार्त्त-निस्वनैः
क्षणे क्षणेऽन्तर्गत-दुःखनिर्भरम् ।
निराम.सैवाखिलचित्तमन्दिरे
भवेद्विभक्तः किल सद्यवेदनः ॥ ११ ॥

अहोवत प्रेमनिधे ! भवाम्बुधौ
निराश्रयान् सन्तरणाक्षमांस्तु नः ।
अघप्रवाहोद्दलनार्त्त-जीवितान्
विमुच्य यातः कथमश्रुलाननान् ॥ १२ ॥

श्रुतोपदेशाम्बु निषेचनैः सदा
विवर्द्धितो यत्र सुसम्विदङ्कुरः ।
अहो निपात्य स्वयमेव तद्भुवि
प्रयासि मूलच्छिदुरं व्यथाशनिम् ॥ १३ ॥

निरीक्ष्य ते पुत्रमुखाम्बुजं प्रभो !
विषादलिप्तं व्यथितोऽन्तरात्मनि ।
स्वभावज स्नेहजलेन साम्प्रतं
निषिञ्चतेऽस्मिन् वद कस्त्वया विना ॥ १४ ॥

प्रभात-सूर्य्य-प्रतिम ! त्वया पुरा
ज्ञानांशुभिः क्षालितमान्तरं तमः ।
प्रभाकरे त्यक्तसमस्त-सम्पदि
संध्येव ते राज्यमुपैति तत् पुनः ॥ १५ ॥

प्रबोधमन्दानिलतः स्फुटोन्मुखं
हृदम्बुजं नो न जहाति कौड्मलम् ।
दिवात्ययेऽस्तं विगते खरद्युतौ
भवेत् प्रफुल्ला किमु पद्मिनी सती ॥ १६ ॥

वितर्क-सर्पाकुल-शास्त्र-काननात्
सदर्थ-पुष्पाणि निचित्य सन्ततम् ।
विज्ञान-तन्तुग्रथितां गलस्रजं
प्रियंवदानां विदधाति कोऽधुना ॥ १७ ॥

गृहोपकण्ठे शिशुभिः स्वसम्भृभिः
समन्वितः कौतुक-लीलया मुहुः ।
निरस्य संसार-समस्त-यन्त्रणां
प्रमोदराज्यं भुवि कोऽनुतिष्ठति ॥ १८ ॥

प्रभात-सान्ध्यादि विधेरनन्तरं
गृहीतपुष्पाञ्जलिभिः स्ववंशजैः ।
प्रगाढ़-भक्ति स्फुटितामलस्तुतिं
करिष्यते को गृहदेवतार्चनाम् ॥ १८ ॥

पितेव यस्यैव सखेव सन्ततेः
स्नेहेन शास्त्रेण सुखेन मानसम् ।
शिखाम्बु-संयोग-विशुद्धदीप्तिम-
द्धेमोनिभं कोऽत्र विधातुमर्हति ॥ २० ॥

गभीरशोकान्धतयात्मविस्मृताः
सुहृज्जनास्ते परिरभ्य शीतलाम् ।
सदा सुतोच्छेदसहां वसुन्धरां
रुदन्ति तद्धैर्यकणाभिकामनाः ॥ २१ ॥

प्रतिध्वनि-क्रन्दनभाश्रिता दिवि
तन्वन्ति देव-प्रमदं दिगङ्गनाः ।
अहो विधाता परिपीड्य कञ्चन
लोकं तदन्यन्तु युनक्ति शर्म्मणा ॥ २२ ॥

विलप्य पश्चा ललितः पितामहं
मूर्च्छासखीक्रोड़गतोऽतिगौरवात् ।
जगाम तं द्रष्टुमिवोत्सुकः पुन-
रप्राप्य दुःखेन निवर्त्तितोऽभवत् ॥ २३ ॥

इति श्रीमन्महेन्द्र विरचिते भूदेवनिर्व्वाणकाव्ये
ललित-विलापो नाम प्रथमः परिच्छेदः ॥

द्वितीयः परिच्छेदः ।

तथार्त्तनादग्लपिताङ्गबान्धवं
प्रबोधदानच्छलमन्दभाषिणी ।
चिरायवासप्रियभूमिवर्ज्जन—
नितान्तदुःखामुत सन्ततिं प्रति ॥ १ ॥

वियोग-शोकानिव मूर्त्तिमागता
निवर्त्तयन्ती तटसंस्थितानुत
सुशीतलस्पर्श-तरङ्गपाणिना
परामृशन्ती सुतविग्रहं मुदा ॥ २ ॥

अदृष्ट-पूर्व्वाश्रमयानभीरुकं
प्रदर्शयन्ती रमणीयमम्बरम् ।
बलाहकच्छेदविभक्तनीलिम
वितानकल्पन्तु विधातृचिचितम् ॥ ३ ॥

भूदेवमङ्के विनिवेश्य साम्प्रतं
नून दिवं याति निवास वासनम् ।
आरुह्य कार्त्तस्वर पुञ्जभास्वरं
यादोवरं शङ्करमौलिवासिनी ॥ ४ ॥ *

सुतादि-विच्छेद-समाकुलाकृतिं
ब्रवीति नूनं सुरनिम्नगाधुना ।
भ्रातः सुखानां निरपाय-संश्रयं
त्यक्त्वा क इच्छेद्भुवने चिरस्थितिम् ॥ ५ ॥

गृहे गृहे यत्र सुखानि दुःखका-
न्यावृत्तिमायान्ति कुलालचक्रवत् ।
वसन्तमन्दानिलफुल्लमञ्जरी
रसाल-मालातपधौतपल्लवा ॥ ६ ॥

* इति चतुर्भिः कलापकम् ॥

प्रमोदयन्नम्बुजिनीं विभासते
विभावसुः पश्य विपाटलच्छविः ।
विधाय तामेव विषादिनीं पुनः
गन्तास्तशैलं परिणामदुर्व्वलः ॥ ७ ॥

कुमुद्वती-प्राणपतिर्वियोगिनीं
विधाय कान्तां विधिना नियन्त्रितः ।
प्रकाशयत्यत्र न दुःखमिश्रितं
न लभ्यते शर्म्म धरानिवासिभिः ॥ ८ ॥

मनोभवो यत्र मनोऽध्वना नृणा-
मलक्षितं चौर इवात्ममन्दिरे ।
प्रविश्य मुष्णात्यविलम्बितं बला-
न्महोमदां निर्म्मल-चेतना-धनम् ॥ ९ ॥

क्रोधोऽपि मत्तद्विरदो दिवानिशं
मुहुर्मुहुर्याति मनःसरस्तटे ।
लब्धावकाशो दलति प्रविश्य सः
प्रफुल्लसद्भाव-सरोज सञ्चयम् ॥ १०

प्रलाभ्य लोभो विषयैः सतामपि
चेतांसि संसारमरौ विनिःक्षिपेत् ।
विडम्बयेद्वा मृगतृष्णयानिशं
वाञ्छन्ति के तस्य चिराय सन्निधिम् ॥११॥

मोहोऽपि कश्चित् परमैन्द्रजालिकः
सदैन्द्रजालैर्मनुजान् विमोहयन् ।
निष्कृष्य सज्ज्ञानधनानि पङ्किले
निपातयेत्तान् विषयान्धगह्वरे ॥ १२ ॥

मदो वराहो हृदयोर्व्वरस्थलीं
निखाय यत्नोत्तमभक्तिमुस्तकम् ।
समूल मश्नाति सतान्तदास्पदे
सदा निवासः शुभदो भवेत् किमु ॥ १३ ॥

मात्सर्य्यगृध्रोऽपि चरन्नितस्ततः
विज्ञानचक्षूंषि हरेत् क्षणान्नृणाम् ।
प्राणानिवास्मिन् परिभाव्य भौतिकां
स्तान्येषु मूढा इव सञ्चरन्ति ते ॥ १४ ॥

यथा प्रगल्भायुवतिर्जरत्पतेः
वागङ्कुशैः कृन्तति मर्म्म निर्द्दयम्।
हिंसा परद्वेषनिशातशङ्कुभिः
भिनत्ति मर्म्माणि च भूसदान्तथा ॥ १५ ॥

मायाविनोवाररमेव वासना
विरच्य-सौधानिव कल्पनाचितौ।
नीत्वा नरान् धर्म्मवलम्वविच्युता
न्निपातयेद्दुस्तरकल्मषाम्बुधौ ॥ १६ ॥

अतस्तदीयं खलु पूर्वमाश्रमं
विहाय गन्तुं किमु दुर्म्मनायसे।
चिरन्तनप्रीतिमपास्य सम्प्रति
द्वितीयराज्यं भव गन्तुमुद्यतः ॥ १७ ॥

जरारुजामृत्यु-परीत-विग्रहाः
भवे सदा खेदमुपेत्य दारुणम्।
उद्वेजितास्तत्र विहाय मेदिनीं
लभन्ति शान्तिं समये विपश्चितः १८ ॥

प्रभात-मार्त्तण्ड-मयूख-रञ्जिते
दाक्षिण्य-सम्पन्न समोर-सेविते।
सुरेन्द्र-राज्याश्रम-वर्त्मनि त्वया
निधीयतां चित्तमपूर्व्ववीक्षिते ॥ १९ ॥

अहो पुरः पश्य पयोदमालिका
देवेन्द्रधामोद्गमनाय सत्वरम्।
समीरविश्लिष्टतया दधाति ते
नीलाभ्रसोपान मिवाति सुन्दरम् ॥ २० ॥

क्वचित् सहस्रांशुकरारुणच्छविः
पयोदपङ्क्तिः किमुताब्धिमन्दिरात्।
सुरेशरोषापगमे विभासितः
सपक्ष-मैनाक-गिरि र्हिरण्मयः ॥ २१ ॥

क्वचिन्मरुद्भिः परिचालिता सती
गजादि-साद्दश्यमुपागताभवत्।
मन्ये तवाभ्यागमनाय वृत्रहा
सम्प्रेषयामास बलानि पूर्व्वतः ॥ २२ ॥

इतोऽन्यतो वत्स ! चलन्तमम्बरे
सितत्विषं वारिदखण्डमोचताम् ।
तवैव वार्त्ता मतितोषदायिनीं
प्रयाति दातुन्त्वरया मरुत्वते ॥ २३ ॥

अहो अहो पश्य निमेषमात्रतः
वियद्विहारक्षमयानमाश्रिताः ।
त्यक्त्वा तरुश्याम-समृद्ध-मेदिनीं
मेघानधोऽधः समुपस्थिता वयम् ॥ २४ ॥

इतो मुहूर्त्तं प्रविलम्ब्य पुत्रक !
पथिश्रमं जातु विनेतुमर्हसि ।
पयोधराम्भःकणसिक्तशीतलैः
शनैः शनैर्गन्धवहैर्निषेवितः ॥ २५ ॥

सुरेन्द्रलोकं व्रजत स्तव प्रिय !
नीचैरिदानीं जलदास्तचारिणः ।
समन्ततः पादपसङ्कुला मही
संदृश्यते श्यामसरावरूपिणी ॥ २६

इतोऽपि पृथ्वी-परिणाम मद्भुतं
स्थैर्य्याय ते सौम्य! विलोकयाम्यहर्म्म्॥
स्मरन् सीता-वल्लभ-कर्म्म-सम्पदं
तृणाय मन्तासि निजास्थिरश्रियम्॥ २७॥

तमालशालावलिनीलभूरितो
विलोक्यते रामनिकेतनस्थली।
मनुष्यलीलारसलुब्धमानसो
यदङ्ग मङ्गीकृतवान् स्वयं प्रभुः॥ २८॥

निशाचर-त्रास-विमुक्ति-हेतवे
यस्यां समुद्भूय जनाभिरक्षया।
दयावतारो भगवान् भवेऽमलां
प्रकाशयामास सुकृत्यपद्धतिम्॥ २९॥

अव्याजमिज्या मृषिभिर्विधित्सया
नरोचितां शैशवयातुभीरुताम्।
अपास्य वीर्य्यातिशयेन योऽवधी
मूर्त्तान्तरायं तपसस्तु ताड़काम्॥ ३०॥

यदीयपादाम्बुजरेणुसङ्गमा
दपीस्य पाषाणशरीर मञ्जसा।
लेभे सहस्राक्षविलोभियौवनं
भूयः श्रिया गौतमधर्म्मवल्लभा ॥ २१ ॥

अनेक राजन्यजनाक्षमोद्धरं
कोदण्ड मादाय पिनाकि-लीलया।
सीताविवाहेन बभञ्ज यः क्षणात्
सभासदां पूर्ण-मनोरथानिव ॥ २२ ॥

प्रतापलब्धामपि जानकीन्तदा
पयोधिमन्थोद्धरितां रमामिव।
गुरो रनुज्ञा मनवाप्य यस्तदा
ग्रहीतु मैच्छन्न विदेहमन्दिरे। २३ ॥

नरेन्द्र वृन्दान्तक-कल्पभार्गव—
प्रचण्डचापं परिगृह्य पाणिना।
त्रिशङ्कुकामानिव पाकशासनो
लुलाव लोकं ननु तत्तपोर्जितं ॥ २४ ॥

पथ्यश्रुताया अपि गौरवाद्वचः
प्रमाणयन् मातुरतीवदारुणम् ।
जगाम कान्ताधृतवल्कलो वनं
विहाय यो लोष्टमिवात्मसम्पदम् ॥ ३५ ॥

भियेव वस्तुं भरतस्य शासने
प्रियोर्म्मिला-प्रेम विहाय लक्ष्मणः ।
गुणाभिरामं यमनुव्रजन् पुरा
सौभ्रात्रशिषं भुवने व्यलोकयत् ॥ ३६ ॥

गृहाय गन्तुं कथयन्तमाकुलं
प्रियानुजं शिक्षयतोऽस्य भारती ।
जगाम वक्त्रादिमलार्थसङ्गतिः
पूतप्रवाहेव हिमाद्रि-नन्दिनी ॥ ३७ ॥

क्व रामचन्द्रो रविवंशभूषणं
गुहाभिधो वा क्व निषाद-सम्भवः
हृष्टापि यः कुत्सितकर्म्मकारिणं
तमालिलिङ्गे प्रियमात्मवत्सलम् ॥ ३८ ॥

क्व राघवो विक्रमकेशरी स वा
ष्वोलक्ष्मण: सोऽग्रजभक्ति-दीक्षित: ।
गृहे वने कोशलभाञ्जि साम्प्रत
मवाप्यते तत्पदरेखिका किमु ॥ ३९ ॥

पयोदमालेव विभासतेऽग्रत:
प्रातीच्य-विन्ध्याद्रिरसौ विभावय ।
प्रमार्जयन्ती चिरमश्रु लोचने
निवासिनी यत्र तु विन्ध्यवासिनी ॥ ४० ॥

तदन्तभूमौ सुरवंशकेतनं
प्रतापसिंहो नु चितोर-भास्कर: ।
निगीर्य्य तेजो यवनेन्धनेऽखिलं
चिराय मास्त्रं निमिमील लोचनम् ॥ ४१ ॥

नितान्तदुर्भाग्यतया कलङ्किनं
चितोरभूमि: सुषुवे किलोदयम् ।
पुरा पुराली-प्रविशोभितेऽत्र किं
दिवान्यथा क्रोशति जम्बुकोऽशिवम् ॥ ४२ ॥

हा हा धिगवैव च पद्मिनी सती
सम्मानयन्ती स्वसतीत्वमुत्तमम् ।
सुरेशयज्ञेव हुतं हुताशने
जुहाव लावण्य-निधान-विग्रहम् ॥ ४३ ॥

हा कर्म्मदेवी पुनरत्र संस्थिती
लावण्यवीर्य्यैकनिधानरूपिणी ।
ज्ञात्वा सलीलं यवनास्त्रजि स्त्रिया
चकार दौर्ब्बल्य-कलङ्क-भञ्जनम् ॥ ४४ ॥

यदि स्पृशेन् म्लेच्छ-कलङ्क-कालिमा
तदेव भीता स्वसखीजनैः सह ।
कर्णावती वह्निरतरिं त्वरान्विता
करोह वैकुण्ठ-निवास-यायिनीम् ॥ ४५ ॥

त्रियातिदीना वनसङ्कुला पुन
रेषा न वैराग्यमुदीरयेत्तव ।
स्मृत्वा पुनः पूर्व्वसमृद्धिमाकुला
शक्नोमि रोद्धुं नतु नेत्रनिर्झरम् ॥ ४६ ॥

पयोधिमध्ये त्रिदशारिरक्षसां
निवासमालोकय सम्प्रति प्रिय !
हिरण्यलङ्का प्लवते शरीरिव
स्तनूरिव स्रोतसि वीतजीवना ।। ४७ ।।

समन्ततो नीलपयोधि-चेलक—
वृता सुकाञ्चीकृतफेणराजिका ।
सदा जयत्केतन-वाहुधूननै
र्निरासयन्तो द्विषतामिव व्रजम् ।। ४८ ।।

अवोढ़ या नीलबलाहकच्छविं
दशास्यमस्ताखिलविद्विषं दिवि ।
सुरेन्द्रलक्ष्मीश्लथकुन्तलं बला
दरन्तमाश्चर्य्यसमीकपण्डितम् ।। ४९ ।।

यत्रैव तीराङ्गणसङ्गताः पुरा
धनुर्द्धराः कौनपसूनवो रवेः ।
गभस्तिमार्गं प्रतिरुध्य मार्गणै-
रकालमेघोदयतामतन्वत ।। ५० ।।

अत्रैव गेहादुघनमुत्राभानुव-
व्विरेत्य वीरोऽस्त्रपराजनन्दनः ।
शरप्रपातैर्जलधिप्रवाहणं
निरुध्य तेने निजबाहुविक्रमम् ॥ ५१ ॥

ज्वलत्कृशानुप्रभसूर्य्यदीधिति-
मणिस्रगाविष्टितरम्यतोरणा ।
लङ्का स्फुरन्मौक्तिकहारकन्धरा
बभौ तदा राजरमेव निर्म्मला । ५२ ॥

ज्वलच्छटामण्डलमण्डिताकृती
मृगेश्वरौ तोरणपार्श्वनिर्म्मितौ ।
त्रिलोकवीर्य्यमनु वक्रवैकृतै-
रुपेक्षमाणाविव यत्र रेजतुः ॥ ५३ ॥

त्रिलोकनाथोऽपि महेशविग्रह
मस्थापयत्तोरणमूर्द्ध्नि रावणः ।
विलालयन्ती नयनानि यत्पदे
रम्भोऽबलापाणिसरोजसेविते ॥ ५४ ॥

निरन्तरद्वारनिरोधतत्परा
शुभङ्करी मानुषमुण्डमालिनी ।
उवास भक्तिप्रतिरुद्धनिर्गमा
विधाय शम्भावपि दुःखमप्रियम् ।। ५५ ।। *

पयोधरस्थूलनिवासरक्षको
रदच्छटानिर्ज्जितदामिनीच्छविः ।
पयोद-निर्घोष-निरोधि-निस्वनै
रुरोध यत्नोदयमापदामपि ।। ५६ ।।

तथा तदन्ते बलगर्व्वदर्पिता
सांग्रामिकप्राङ्गणभागचारिणी ।
परिस्फुरद्रत्नपरीतकञ्चुक-
वसानसेना नवनीरदच्छविः ।। ५७ ।।

असंख्यतारादलमण्डितामल—
सुनीलदिक्प्रान्तलता व्यभासत ।
पयोदलेशै रहितास्तचन्द्रिका
निशाविषयमूर्त्तिरिवातिशोभिनी ।। ५८ ।।†

* युग्मकं ।
युगलकं ।

सभागृहे पाण्डुरवस्त्रसंस्तृते
निशाचरा भास्वरनीलकान्तयः ।
सुनिर्म्मलाम्भोनिलये विरेजिरे
प्रकाशिता नीलसरोरुहा इव ।। ५८ ।।

मनोज्ञसिंहासनसंस्थितं तदा
दशाननं भानुमिवोदयाद्रिगम् ।
विलोकयन्ती परिषत्सदावली
रराज वापीप्रभवेव पद्मिनी ।। ६० ।।

किं वर्णयाम्यद्भुतरामणीयकं
दशास्यपूर्य्या अपरं तवान्तिके ।
व्योमान्तरोद्यानविकल्पनापटोः
कवेरगम्या मनसापि किं पुनः ।। ६१ ।।

स्वयं समागम्य च शिल्पदेवता
ससर्ज्ज सौधं कलधौतकुट्टिमम् ।
योऽन्तर्ज्वलद्रत्नतुषारपर्व्वतं
तिरस्काराच सितं सितश्रिया ।। ६२ ।।

रणे जयश्रीश्चिरमङ्कशायिनी
नवानुरागाद्दयितेव रावणे।
स्थिराभिलाषा विरसेव वासवे
सेवान्विताऽसर्हत सर्व्वदा चितिः॥ ६३॥

त्रिलोकसौन्दर्य्यकराणि सर्व्वतः
संहृत्य रत्नानि निकेतनस्थलीम्।
विशोभयामास निशाचरायणीः
कान्तो यथा स्वां कमनीयकामिनीम्॥६४॥

समीर-सौगन्ध-विधान-कामुको
मन्दारमानीय महेन्द्र-लोकतः।
निखाय यत्नोन्मदभृङ्गगुञ्जने
ह्यानमुग्धां वनितामनन्दयत्॥ ६५॥

सन्तानमानीय वधूमनोरथ
मपूरयद्राम-रमा-हरो दिवः।
प्रफुल्लपद्मोपमरत्नभूषणै
श्चकासिरे चारु यतोऽप्सरस्त्रियः॥ ६६॥

प्रसूनगन्धो जलविन्दुशीतलः
समीरणो यत्र वधूस्तनांशुकम् ।
हरन्नुपास्तीत् प्रियदूतकर्म्मणा
नवीनरामाकुचलोललोचनम् ॥ ६७ ॥

पुरन्दरप्रेमपराप्सरस्तति
र्निरुध्य यत्रोत्कटशोकमात्मनि ।
अनिच्छयाङ्कं प्रजगाम रक्षमां
प्रियाङ्कमार्त्ताभिनवा वधूरिव ॥ ६८ ॥

सुराङ्गनाश्लेष-विलास-लालसैः
सुरेश्वराङ्कादपि दैवशोषितः ।
बलाद्धृता यत्र विरेजिरे चिरं
करिप्रभ्रष्टा कमला इव श्रिया ॥ ६९ ॥

प्रसूनवाटीगृहकोणमाश्रितः
सुरेश्वरोऽस्या हृतदैवतच्छविः ।
जग्रन्थ मालां गलदश्रुविन्दुभि-
र्मुक्ताफलैरस्तगुणामिव स्रजम् ॥ ७० ॥

मन्दोदरी-माल्य-विधान-हेतवे
मन्दारपुष्पस्तवकं समाहृतम् ।
विनिश्वसन् कोष्ण-समीर-सङ्क्रमे
द्रावयद् म्लानिमतीव वासवः ॥ ७१ ॥

पयोधिदेवो मृदुलोर्म्मिपाणिना
सुवर्णलङ्काधिपपादपल्लवौ ।
प्रक्षालयन्नेव रजोभिरञ्जसा
जगाम मालिन्यमतीव निन्दितम् ॥ ७२ ॥

महीसदां जीवनमिष्टवैभवं
तृणाय मत्वा हरतोऽन्तकारिणः ।
बभूव रक्षोऽखलतृणाहरक्रिया
निरूपिता दण्डजनानुशासनी ॥ ७३ ॥

धनेशनाम्नैव धनेश्वरः स्वयं
तदावतस्थे न तु दिव्यसम्पदा ।
वयं गतेऽप्यावहताज्ञितुष्किकाः
जहाति रत्नं किमु तच्छिरोगतम् ॥ ७४ ॥

यदीक्षणापास्त-समस्त-सम्बल:
पुराऽगमश्चैव्रधरोऽतिदीनताम् ।
धनेश्वर: सोऽपि वराङ्गनांशुकं
प्रसादयन्नास्त निरस्तविक्रम: ॥ ७५

मयूखमाली निजरश्मि-संयमं
विधाय तेने सुखदांशु-जालकम ।
यतो गते भास्वति तत्र तीव्रतां
ततोऽपि तैक्ष्ण्यं भजतेस्म रावण: ॥ ७६ ॥

तदा सुधांशु: परिपूर्णमण्डल:
नुनोद लङ्का-तिमिराणि नित्यश: ।
पानेन त्वमेरपि शीतरश्मिभि:
प्रपेदिरे मोदमतीव राक्षसा: ॥ ७७ ॥

न विद्यते संप्रति स त्रिलोकजित्
दशाननो जीवनमस्य वेश्मन: ।
बलानि बुद्धीन्द्रियकाणि वा नृपे
मते रमन्ते किमुतानुगामिन: ॥ ७८ ॥

दिने दिने रामनिशातपत्रिभि
र्निरीक्षताङ्गैरिव यातुयोद्धृभिः ।
कालापनीताखिलगर्वकेतना
हृताम्तशेषा खलु राक्षसी पुरी ॥ ७९ ॥

विलोक्य लङ्कापरिणाममीदृशं
त्यजेन्नवा को भववास-वासनाम् ।
विलोभ्य या शोकनिशातशस्त्रकैः
भिनत्ति मर्म्माणि नृणां निरन्तरम् ॥ ८० ॥

प्रबोधनार्थं प्रतिबोधशालिने
भुवस्तलेऽन्यत् परिदर्शयामि किम् ।
इतो वसन् यत् फलमश्नुते जनः
तदेव दृश्यं श्रुतितः श्रुतन्तव ॥ ८१ ॥

यदि व्यथाद्यापि वियोग-सम्भवा
निवर्त्तते नो तव याम्यमन्दिरे ।

निरीक्ष्य पापं परिणामदारुणम्
न धास्यसि त्वं भुवन-स्पृहां हृदि ॥ ८२ ॥

इति श्रीमन्महेन्द्रविरचिते भूदेवनिर्व्वाणकाव्ये
भूदेवप्रबोधोनाम द्वितीयः सर्गः ।

तृतीयः सर्गः ।

चलाशु तस्मिन् मम पार्श्वसंस्थितः
शरीरिणां वीक्षितुमात्मनिग्रहम् ।
यदस्मदालोक-निरस्त-कल्मषो
मुच्येत कश्चिन्ननु लाभ एव सः ॥ १ ॥

एषायतस्ते यमगेहगामिनी
चिरप्रतप्तायसनिर्म्मिता सृतिः ।
उद्गीर्ण-वह्नेः कणिकाभिराचिता
पापात्मदुःखप्रथमावतारणी ॥ २ ॥

समाचिता रक्तविलिप्तपाङ्कुभिः
दंष्ट्राकरालास्यपबङ्गसन्निभा।
द्वितीयतो याम्यनिवास-पद्धति
रपेक्षते पापि-कवोष्ण-शोणितम् ॥ ३ ॥

तृतीयतो वह्निभिराततो नृणां
हृदि प्रलीनामपि पापकामनाम्।
स्वकल्पपीयानविहारसङ्गिनी
मन्तः सुगुप्तां रमणीमिवाहरेत् ॥ ४ ॥

विलोकयास्मिन् पथि भानुदीधिति
र्निशातसूचीत्वमवाप पापिषु।
असृक्प्रवाहाः कथमन्यथाङ्गतः
स्रवन्ति तेषां गिरिनिर्झरा इव ॥ ५ ॥

प्रचण्डमार्त्तण्डकराभितापिते
छाया-विहीने रहितेऽम्बु विन्दुभिः।
तृषाकुलाः प्रेतनिकेतयायिनः
पिबन्ति केचिन्निज-नेत्रनिर्झरान् ॥ ६ ॥

केचित् पथि श्रान्ति-विशुष्क-काकुदा
रसातिनि:श्वेष विलोललेहना: ।
स्रवद्दसालिप्ततमानि सौत्सुक
मन्योन्यमङ्गानि लिहन्ति पापिन: ॥ ७ ॥

वुभुक्षयान्त:परितापिता अपि
कृतान्तभृत्यैरभिताड़िता नरा: ।
विशन्ति वक्रै: पदवीं प्रशान्तये
हा तत्र दु:खेन वृणाद्धि चेतना ॥ ८ ॥

नीहार-सम्पात-हिमीकृते क्वचि-
दालिङ्गनोत्थानमुपैतुमिच्छुक: ।
आश्लिष्य कश्चित्सुदिनोपलोपमं
निरस्तवासा नितरां विषीदति ॥ ९ ॥

एवंविधै: कल्मषशास्त्रकण्टकै-
र्विसङ्कुलं मार्गमतीत्य पापिन: ।
तृष्णाकुला वैतरणी-तटस्थली
मुपागता: शीतलनीरकाम्यया ॥ १० ॥

मायामयीं वीक्ष्य तरङ्गिणीमहो
प्रसन्नतोयां भ्रममाकुला इमे ।
अलभ्यलाभः फलकाल-विक्लवो
विगृह्णतो दुःखमुदीरयेत् किल ॥ ११ ॥

दुष्कारिणां गन्धविलाससंस्थलीं
दुर्गन्धदम्भोलिभिराविसारिभिः ।
विदारयन् दारुणभावमाश्रितः
पूयप्रवाहो वहतेऽत्र दुःसहः ॥ १२ ॥

मनोज्ञमूर्त्तिप्रतिबिम्बलालस-
पथेन चित्ते प्रतिमूर्च्छितो हठात् ।
तनोति मूर्च्छामसुजां भ्रमः क्वचि-
दहो दुरन्ता खलु पाप-दुर्गतिः ॥ १३ ॥

विलोक्य मायातरणीं तटान्तिके
पतन्ति नद्यां सहसा शरच्युतः ।
परोपकारैकफला अपि क्वचि-
द्व्रजन्ति भावाः प्रतिकूलचारिताम् ॥ १४ ॥

वदन्ति केचिद्दवेन तापिताः
क्रोशन्ति नक्रैर्दलिताश्च केचन।
प्रवाहवेगैर्वलितास्तु पापिनः
सीदन्ति नद्यां शवभावमूर्च्छिताः॥ १५॥

विषादहर्ष्यं बहुशोऽत्र विद्यते
तथापि तद्दर्शयितुं बिभेमि ते।
दुःखं ह्रदादर्शविशेषमूर्च्छितं
स्थैर्य्यं सतां लुम्पति पश्यतामपि॥ १६॥

अलं विलम्बेन त्रिवेदिमानसं
कृतान्तगेहे गमनाय सांप्रतम्।
धरानिलस्पर्शकलङ्कविग्रहम्
पुनीमहे वीक्ष्य शरांशु नन्दनम्॥ १७॥

विलोक्यते दक्षिणतोऽन्तकस्थली
धूमाविला पापिविलापनादिता।
पाषाणसंघोघनदक्षसंकुला
विभिद्य या शाल्मलिवालधारिणी॥ १८॥

कङ्कालभूषान्तनिविष्टलोचना
दौवारिका भीषणमूर्त्तयोऽचिरात्।
अस्माकमालोक्य च दैवतच्छविम्
कोऽप्यन्ति मार्गन्त्वरितं ससम्भ्रमम् ॥ १८ ॥

अन्यैरनुज्ञापि कृतान्तसंस्थिति
र्विज्ञायते दर्शनमात्रमेव हि।
औत्सुक्यतो दर्शनकाङ्क्षिणामपि
हृदि व्यथामातनुते क्षणादियम् ॥ २० ॥

पश्य क्रमेणाम्बरचारिणां पुन-
रस्माकमक्ष्णोर्विषयेऽघतापिनः।
सदा रुदन्तः करुणानुदेवितैः
स्पृशन्ति कृच्छ्रं कलङ्किता अपि ॥ २१ ॥

पापाशनो दण्डभुजङ्गसञ्चयो
दंदश्यते निर्द्दयमत्र पापिनः।
नायात्यहो कोऽपि विलापखेदित
दयागुणग्रन्थिविधानपण्डितः ॥ २२ ॥

हा कष्टमालोकय पूर्व्वसंस्थितौ
वार्ग्वक्रिभिर्बान्धवमर्म्मदाहिनः ।
सायन्तनव्रघ्नमिवोष्णलोहितं
गिलन्ति मुञ्चन्ति च लौहगोलकम् ॥ २३ ॥

वुभुक्षितक्षाममुखे कृपावशा
दनर्पयन्तोऽन्नकणामपि क्वचित् ।
अभोजनोद्दोमश्रुचौ जिघत्सताम्
पतन्ति कुम्भाविव दुर्गतौ चिरम् ॥ २४ ॥

निरासयन् स्वैव निजाश्रिताञ्जनान्
स्वादूपभोक्ता स्वयमेव सर्व्वदा ।
निपत्य निष्ठीवनपूर्णगह्वरे
श्लेष्माणमश्नात्यपि गन्धसम्पुटैः ॥ २५ ॥

विलोकयास्मिन् परदारसङ्गमी
स्वदेह-निष्कृत-समूढ़-रेतसि ।
निपत्य कुण्डे क्रिमिजग्धविग्रहः
स्पर्शेन्द्रियं धिक्कुरुतेऽतिविह्वलः ॥ २६ ॥

कटाक्षयन्तो हरिभक्तिगद्गदा
नाराधनाभङ्गविधानमिच्छवः।
पतन्ति तेषां प्रतिघौर्व्वदुर्गमे
नैवाम्बुदभ्यचरदापदां ह्रदे॥ २७॥

यस्माद्दते जन्तुबधं विधाय या
मवाव तृप्तिं रसनार्थतत्परः।
सैवाधुना द्वेषपरैव पापिनं
रुजन्ति लालाविलमज्जगह्वरे॥ २८॥

विभिद्य कान्तं कटुवाक्यकण्टकैः
शेते वधूरायसकण्टकास्थलीम्।
वचांसि तान्येव निखातकण्टक-
रूपेण मन्येऽत्र वसन्ति सर्व्वथा॥ २९॥

विषप्रयोगेन निहत्य जीवित
मवाप यः कामपि तृप्तिसम्पदम्।
हा कालकूटं पिवतोऽपि दुर्गतौ
निरेति नो तस्य चिराय जीवनम्॥ ३०॥

निहत्य मत्स्यं वड़िशेन भूतले
तनैव भिन्नोऽत्र विलम्बते नरः ।
विद्युद्विलासास्थिरवृत्तिहेतवे
गच्छन्ति लोकाः कथमीदृशीं दशाम् ॥ ३१ ॥

धनानि वाञ्छन्नथवातिकोपतः
निघ्ननरान् दुर्गति मेति भूमिपः ।
मन्येऽधुना वृश्चिकरूपधारिणो
दशन्ति रोषैर्नृपतिन्त एव हि ॥ ३२ ॥

पराङ्गनाश्रोणिकुचेषु कामतो
विलालयन्तो नयनानि भूतले ।
व्रजन्ति कुण्डे नरनेत्रलोलुप-
काकेन नेत्रेषु भृशं विड़म्बिताः ॥ ३३ ॥

धनेच्छया मानवघातिनोऽधुना
विशन्ति पश्यत्वसिपत्रकानने ।
इतस्ततः शस्त्रविदारिता अपि
त्यजन्ति नो शासनवेदनो धियः ॥ ३४ ॥

समीक्षतां ग्रामविदाहकारिणं
कृतान्तभृत्याः परिहृत्य सर्व्वदा।
निशातशस्त्रैर्विदलन्ति निर्दयं
विपक्ककुष्माण्डमिवामयद्विषः ॥ ३५ ॥

अकारणाविन्दुकतामुपेयुषां
व्यालीव वाणी प्रदशेद् यशस्विनम्।
सैवाधुनास्मिन् प्रतिकूलचारिणो
सूचिस्वरूपेण छिनत्ति पापिनः ॥ ३६ ॥

यथेप्सितप्रेमविलासलालसाः
कटाक्षपातै विदुषां मनांसि च।
बलाद्धरन्त्री मदनोन्मदाः स्त्रियो
ह्रियं त्यजन्त्यो रमणीजनोचिताम् ॥ ३७ ॥

सुगन्धतैलैरभिमृज्य कुन्तलान्
भुजङ्गलीलान्वितवेणिबन्धनैः।
विधाय पुष्पस्तवकैः शिरःश्रियं
समर्थयन्त्यः स्वविलासलालसाम् ॥ ३८ ॥

ताम्बुलरक्ताधरसान्ध्यवारिदे
विकाशयन्त्यो मृदुहासविद्युतम ।
स्रवत्सुधालुब्धमनुष्यचातकान्
प्रतर्पयन्त्यो निजहर्म्मिहेतवे ॥ ३९ ॥

विभूषणावर्द्धितयौवनश्रिया
विलोभयन्त्योऽभिमताबवाबवान् ।
दिने दिने मन्मथदेवहसये
बलीन्दन्त्यो मनुजानजानिव ॥ ४० ॥

अचिन्तयन्त्यः परिपाकदारुणं
फलं क्रतोरस्य भवे तदातनैः ।
सुखैस्तु या मन्मथयज्ञदीक्षिताः
विरेजिरे पूर्णमनोरथा इव ॥ ४१ ॥

इति कुलकम्

तिरस्कृता यौवनशोभयाधुना
पिशङ्गरुक्षक्रिमिकीर्णकुन्तलैः ।
सदा भुजङ्गैरिव रोषपिङ्गलै
रुदन्ति दष्टा इव वारयोषितः ॥ ४२ ॥

लावण्यमङ्गेषु तिलेषु तैलव-
न्निषक्तमासान्तु विलासविभ्रमैः ।
निष्पेषणात् प्राक्कथमत्र दुर्गतौ
निरीक्ष्य यातं यमतैलिभीतितः * ॥ ४३ ॥

आकर्णविश्रान्तविलोललोचनैः
सुखाञ्जनैर्नित्य मुपासितैरपि ।
उपेक्षिताः कोटरगामिभि र्भया
द्यतो नृशंसा विभवान्तसौहृदाः ॥ ४४ ॥

विलेपवस्तूत्सुखितेषु साम्प्रत
मङ्गेष्वमीषां क्रिमयो दिवानिशम् ।
निवास मासु विषदिग्धतुण्डकैः
खनन्ति गर्त्तानसु भूतलेष्विव ॥ ४५ ॥

असृग्विलिप्तेषु नखाभिघाततः
कुचेष्वमीषामुपविश्य वायसाः
बुभुक्षया भैरवरावगर्व्विताः
निष्कृष्य निष्कृष्य गिलन्ति लोचने ॥ ४६ ॥

* तैली — तैलिक इत्यर्थः । 'कलु' इति भाषा ।

दिगम्बरा: प्राक्तनजारसन्निभा:
कृशानुसंसर्गविपाण्डुमूर्त्तय: ।
अयोनरा यान्ति समक्षमादरा-
द्दिगम्बरीस्ता: परिरब्धुमिच्छुका: ॥ ४७ ॥

दृशा ममीषां श्रुतविश्रुता अपि
व्रजन्ति कन्दर्पशरावमोहिता: ।
अहो शर ! त्वं हृतविग्रहोऽपि न
पिनाकिना वीतपराक्रमोऽभव: ॥ ४८ ॥

स्वकर्म्मदोषात् पतिरत्नवञ्चिता:
पलाशिनाशात् स्खलिता लता यथा ।
सदा यतीनां नियमैकलम्बना:
या भान्ति देव्य स्त्रिदिवच्युता इव ॥ ४९ ॥

अपत्रपुष्पा अपि मञ्जुलाकृती:
फलेन हीना ध्रुवमायतावपि ।
सुवर्णवल्लीरिव या: सुहृद्द्रुमा:
वहन्ति मूर्द्ध्ना भुवने ससम्भ्रमम् ॥ ५० ॥

महर्षिनिर्द्दिष्टपथावलम्बिनी:
क्रमीद्धरित्रीविषयाद्विनि:सृता: ।
मुक्तप्रतीहारदिवोन्मुखी: स्त्रियो
निवर्त्तयन्त: परिलोभ्य चाटुभि: ॥ ५१ ॥

कदर्थयन्तो वचनं मनीषिणाम्
प्रवर्त्तयन्त: पथि पङ्कपिच्छिले ।
विश्वासिनीस्ता व्रततीरिवात्र ये
नराश्रयन्ते विषपादपानिव ॥ ५२ ॥

छिन्नाम्बरा रुक्षपिशङ्गकुन्तला:
अन्त:प्रविष्टारुणनेत्रभीषणा: ।
विलीनलेखा: परिशुष्कविग्रहा:
कङ्कालशेषा: परितापविह्वला: ॥ ५३ ॥

निवारितुन्ते हृदयानलज्वरं
कुद्दालकल्पैर्नखरै स्वर:स्थलीम् ।
विदार्य्य ताभ्य: परितापभाषितै:
यच्छन्ति हृत्पिण्डमुपायनं कांचित् ॥ ५४ ॥

तथा पुनस्तान् परिवेष्ट्य ताः स्त्रियो
हृदग्निसन्तापविलुप्तचेतनाः।
अदृष्टपूर्व्वांध्वनिदेशसद्गुरून्
पृच्छन्ति नूनं किमु नाक एष वः ।। ५५ ।।

अनुत्तरांस्ताननुतापविक्लवान्
प्रतारकाणां पदवी मुपेयुषः।
पापाग्निदग्धानपि वाक्यवह्निभि
र्म्मर्म्मोपघातं ज्वलयन्ति निश्चितम् ।। ५६ ।।

येषां मुखे ब्रह्मकृपा हि केवलं
चित्ते तु नित्यं विषयोऽवभासते।
यदि स्फुटास्यान्नयनेन हृन्मसो
काचेन चक्षु स्तत एव संवृतम् ।। ५७ ।।

प्रसूनमाल्यं कमनीयकामिनी
विलासवस्तूनि मनोहराणि च।
उपासनायां ननु यान्ति सन्निधिं
मनांसि येषां प्रणयद्रवाणि च ।। ५८ ।।

तेषां मनो ब्रह्मविभाविभासित
मितस्ततो भ्राम्यति शान्तयेऽधुना ।
अहो न काचिद्भगिनी विराजते
करिष्यते यामृतवर्ष मादरात् ॥ ५९ ॥

अन्तर्मलानां दहनाय तादृशां
यमेन दत्तो हृदयेऽनलोध्रुवम् ।
किमन्यथास्मिन्नरकेऽश्रुधारया
वक्षःस्थलन्ते द्रवयन्ति सर्व्वथा । ६० ॥

स्वकामिनीकाञ्चनवर्ज्जनात् पुरा
विरागिमत्तां यतयस्तु लेभिरे ।
केषां पुनर्गेहवधूर्हरन्ति ये
विराग्यभिख्या मुपयान्ति तेऽधुना ॥ ६१ ॥

वदन्ति ते पावनकृष्णनामकं
ध्यायन्ति च त्वा स्तिलकाङ्किताकृतीः ।
कृत्वा कृतार्थानिव गेहसंस्थितान्
गृहं गृहं नित्यमटन्ति पूजिताः ॥ ६२ ॥

पश्याधुनैतान् नवधर्म्मकञ्चुक-
तिरोहिताङ्गान् विदलन्ति दन्तिनः ।
तप्तायसी स्त्री परिलिङ्गतेऽथवा
दुःखेन कृत्वाग्रिमसौख्यनिष्क्रयम् ॥ ६३ ॥

निपीय पीयूषमिवानिशं मधु
मदेन युक्ताः सुहृदेव विद्विषा ।
निरस्तविज्ञानबलास्तु येऽपरा
नुद्वेजयन्ते भुवि पाशवैर्बलैः ॥ ६४ ॥

सुतां स्वमार जननीमपि क्वचित्
कामोपलब्धैर गणयन्ति ते तदा ।
पापं किमस्माद्भुवने नृणां गुरु
सुरा च विश्वे किमु कर्त्तुमक्षमा ॥ ६५ ॥

पश्याधुना ते नृकपालसम्पुटे
पिबन्त्यजस्रं रुधिरं पिपासिताः ।
भ्रष्टो न तेषामुपशम्य तत्तृषां
विशेषतोऽन्तर्दहनाय कल्पते ॥ ६६ ॥

अध्यास्य धर्म्मासनमाततायिनो
दलन्ति ये ये मनुजान् पशूनिव ।
तेषां दशां वीक्ष्य तवापि मानसा
दधीनतादैन्यमुपैतु पश्चिमम् ॥ ६७ ॥

मदोन्मदा भावविशालविग्रहाः
गण्डस्थल-प्रस्रुत-दान-वारयः ।
पदैः सदा ताम् विदलन्ति दन्तिनो
मूर्त्तानिदेश्या इव भानु-सन्ततेः ॥ ६८ ॥

करैः प्रजापीड़नकारिणाम्पुन
र्बलादलर्का विषदन्तपंक्तिभिः ।
खादन्ति देहादुरुधिरोक्षितामिष
मपूर्व्वसुस्वादनिमीललोचनाः ॥ ६९ ॥

श्वेताङ्ग-सम्मर्ज्जन-भीति-विह्वलाः
जनानदण्ड्यानपिदण्डयन्ति ये ।
दृष्टापि तेषामपराधहीनतां
स्वकार्य्य-दायित्व-तिरष्कृतान्तराः ॥ ७० ॥

असंवृते घर्घर-राव शब्दिते
घनान्धकारे तड़िताभिपातनम् ।
उत्प्रेक्षमाना: घनवर्षकम्पिता:
भ्रमन्ति सीदन्ति च तेऽत्र भीरव: ।। ७१ ।।

पापात्मनाम्पाप विपाक-दुर्गति
स्त्वयाधुनास्मिन् कियती विलोकिता ।
किमस्ति तेऽद्यापि कुवास-वासना
तन्मेप्रिय: संप्रति वक्तुमर्हति ।। ७२ ।।

एवं वदन्त्यश्रुमुखी सुरेश्वरी
दु:खेन दीना निरयेऽतितापिनाम् ।
निष्कम्पवल्लीव हिमाम्बु विप्लुता
भूदेव-वाक्यं प्रणयादपेक्षते ।। ७३ ।।

इति श्रीमन्महेन्द्रविरचिते भूदेवनिर्व्वाणकाव्ये
पापपरिणामदर्शनं नाम तृतीय: सर्ग: ।

———

चतुर्थः सर्गः ।

अथो तदीयामवधाय भारतीम्
भूदेव एवं प्रतिवक्ति जाह्नवीम् ।
निर्म्मूलिता मे भवकामनालता
पापिव्यथा मां व्यथयन्ति निर्द्दयम् ॥ १ ॥

एतद्व्यथा-दृष्टि-विलुप्त-चेतनः
पश्यामि मातस्तिमिरावृतादिशः ।
विषादवेगं परितः प्रवर्त्तितं
शक्नोमि रोद्धुं नच धैर्य्यबन्धनैः । २ ॥

एवं विपन्नान् विलपन्तमादरा
दङ्के निधायेश्वरमूर्द्धचारिणी ।
धर्म्मासनाध्यासितपुण्यविग्रह—
कृतान्तदेवान्तिकमागता सती ॥ ३ ॥

तद्गौरवादासनतः समुत्थित
र्देहप्रभाभासितसभ्यमण्डलिम् ।
प्रभासयन्ती मृदुहास्यभातिभिः
कृताञ्जलिरेवं विनयेन भाषते ॥ ४ ॥

यमश्विनाभ्भास्वरकीर्त्तिसञ्चयैः
पुण्यात्मनां निर्म्मलपुण्यराशिभिः ।
निर्म्माय यो विश्वसृजानिधापित
आचारदेवो भुवनेष्विवामलः । ५ ॥

समाप्य कृत्यं भुवने मनीषिणा
र्मालिप्त एवाखिल-भाव-कर्द्दमैः ।
संसार-दावानल-दग्ध शोधित —
हेमोपमः सोऽय मिहागतोऽधुना ॥ ६ ॥

समागता प्राक् पतिदेवता सती
विधे विधानात्तव पुण्य-सद्मनि ।
निरोजयैनं कृपया तया समं
सुदीर्घ-विच्छेद-निराश-मानसम् ॥ ७ ॥

अनेकसंवत्सरतः परम् प्रिया
प्रियं विलोक्यात्मनि यातु निर्वृतिम् ।
अवग्रहान्तेऽचिरवर्षणोन्मुखं
सुनीलमेघं तृषितेव चातकी ॥ ८ ॥

सरिद्वरा-प्रार्थित-गौरवात् पुनः
सतमङ्गजामोदरयेण भानुजः ।
अचिन्त्यसम्पत्प्रतिपत्तिविस्मितः
सम्मानयन्ताविदमाह सादरम् ॥ ९ ॥

पतिव्रता सा नियमातिमानिना
मयानुगेनेव पवित्रमन्दिरे ।
आनीय काले सुचरित्र-देवता
संस्थापितास्मिन् रुचिरोत्तराश्रमे ॥ १० ॥

विनीत-दासी-धन-वस्तु-सम्पदा
गृहेषु पूर्णेष्वपि सा तपस्विनी ।
विपालयन्ती विरतव्रत तव
कटाक्षपातं न करोति केष्वपि ॥ ११ ॥

दृष्ट्वाद्य तस्या वदनं विभासितम्
भानूदये फुल्लसरोजसन्निभम् ।
पापिव्यथालोकनविह्वलं सदा
ममापि शान्तिं लभमेतु मानसम् ॥ १२ ॥

इति ब्रुवानश्चलितस्तदन्तिके
निर्दिश्य पन्थानमिवाग्रतस्तयोः ।
प्रयाति मर्त्त्योऽपि स धर्म्म-धर्म्मदा-
मध्ये पुनस्तोष इवात्त-विग्रहः ॥ १३ ॥

विलोकयन्तो यमगेहरम्यतां
समालपन्तो भवभाषितं मिथः ।
तामेव नूनं धृत-विग्रहा मुद
इवोप गच्छन्ति च भक्तिसज्ञिकाम् ॥ १४ ॥

ध्यात्वा च पत्युश्चरणाम्बुजद्वयं
समर्च्चयन्तो, पतिमेव सर्व्वदा ।
समागतं स्वामिनमत्र मन्यते
वरं प्रदातुं त्रिदिवादिवागतम् ॥ १५ ॥

विदर्भपुत्री विरहात्यये नलं
चिन्ता यथा प्रार्थितवत्सभूपतिम् ।
सती यथाराधनतस्मधूर्ज्जटिं
शकुन्तलाभिन्ननृपं शकुन्तला ॥ १६ ॥

तथाविधं स्वामिनमेत्य तादृशी
प्रमोदिनी वाष्पनिरुद्धभाषिता ।
विच्छेदजं लोचनसश्रुताश्रुभिः
दुःखं पुनर्मुञ्चति पूर्वसञ्चितम् ॥ १७ ॥

प्रणामसत्कारविधौ प्रसारिते
ताम्रोदरेऽस्या मृदुपाणिसम्पुटे ।
प्रत्येकमेषां चरणं विराजते
रक्तोत्पले रक्तसरोजसन्निभम् ॥ १८ ॥

क्षणान्नियम्यान्तर वैक्लवं सती
निवेश्य तानासनमूर्द्ध्नि सम्भ्रमैः ।
तथा स्मरन्ती भवबान्धवान् धिया
शनैः पतिं पृच्छति गेहमङ्गलम् ॥ १९ ॥

प्रशान्तबुद्धिर्मितभाषणो मृदु
द्वितीयमूर्त्तेरिव यो बभौ तव ।
प्रियो य आसीन्मम जीवनादपि
गोविन्ददेवः स शिवेन वर्त्तते ॥ २० ॥

पुरा धरण्यां चतुरं प्रियंवदन्
जहार यः श्रण्वइवामृतानि मत् ।
सदा प्रसन्नोऽखिल-कर्म्म-पण्डितो
मुकुन्ददेवो रमते सुखेन सः ॥ २१ ॥

शरीरिणी स्नेहलतैव कोमला
दयैव साक्षात् धृतविग्रहाथवा ।
सतीव सा मे शिवगेहशोभिनी
शिवेन सार्द्धं वसति प्रियात्मजा ॥ २२ ॥

यन्मूर्त्तिरद्यापि विभेव विद्युतां
मन्मानसे भाति विलुप्यते पुनः ।
विवर्त्तते सा विजयेति संज्ञिता
किमद्य तस्मिन्ननुरूपभर्त्तृका ॥ २३ ॥

एषामिदानीं प्रवयस्त्वमायुषां
मध्ये प्रजातास्तनया नवा नवाः।
परस्पर-प्रेम-निबद्ध-मानसाः
सुखेन किन्ते गमयन्ति वासरान् ॥ २४ ॥

एवं तया बान्धवसंश्रितां कथाम्
पृष्टः स निर्लिप्त इवोत्तरेत्ध्रुवम्।
तपोऽनिलैः प्रज्वलिते तदर्च्चिसि
मायावृतिः प्रावरितुं क्षमेत किम् ॥ २५ ॥

सुतौ तु गोविन्दमुकुन्दसञ्ज्ञका-
वभिन्नवल्लीद्भवपुष्पसन्निभौ।
यशःसुगन्धैः परितो दिगन्तरान्
सदा सुगन्धीकुरुतस्तदात्मजौ ॥ २६ ॥

गोविन्दपत्नी समये सुखोचितां
सुचारुशीलां तनयामसूयत।
शशाङ्कलेखेव शशाङ्ककान्तकं
पितुर्मनो या द्रवयत्यनारतम् ॥ २७ ॥

गोविन्दजायेव मुकुन्दपत्न्यपि
सुतां सुरूपां प्रथमेऽन्वसूयत ।
स्नुषा कृता सा शशिभूषणेन वा
गणेशलीलाप्रतिमेव सादरम् ॥ २८ ॥*

कन्या पुनस्ते प्रथमा भवेऽधुना
संवर्द्धिता भर्त्तृसुतासुतैरपि ।
गार्हस्थ्यमध्यास्य पवित्र माश्रमं
दीनान् पुनः पालयते स्वशक्तितः ॥ २९ ॥

भवे ह्यथोपायविषाददुर्द्दिने
प्रकाश्य सच्चारु-चरित्र-भास्करम् ।
शचीव सा ते तनया कणीयसी
सुरेशपत्नी सुखिता विराजते ॥ ३० ॥

भवेऽधुनैषां सुतबान्धवा अपि
सुखेन नित्यं निवसन्ति सर्व्वथा ।

* पुरा किल भट्टेन कदाचिदेतस्याः प्रतिकृतिश्च गणेश-
गणेशलीलाप्रतिमारूपेण प्रतिपादिते इति कथानुसन्धेया ॥

तथा सदाचारतयैव सत्क्रियां
कुर्व्वन्ति ते तत्र न नाककाम्यया ॥ ३१ ॥

अतस्तदर्थं हृदयेऽतिकल्पनां
विकल्प्य चिन्तां भुवनस्य मा कुरु ।
असत्स्मृतिर्व्वा गमयेदसत्पदं
बिभेमि तस्माद्भवसंस्मृते रपि ॥ ३२ ॥

प्रबोध्य कान्तां भवकान्तया ततः
कृतान्त-सत्कार-सुहृष्ट-मानसः ।
प्रयाति पत्न्या सह सोऽमरावतीं
सुरेश्वरोद्दर्शितवर्त्मना ध्रुवम् ॥ ३३ ॥

इति श्रीमन्महेन्द्रविरचिते भूदेवनिर्व्वाणकाव्ये
पत्नीसम्मीलनं नाम चतुर्थः सर्गः ।

पञ्चमः सर्गः ।

संप्रस्थितौ तौ नगरीं दिवस्पतेः
विलोकयन्तौ ग्रहसंस्थितिं पथि ।
नभःस्थितानामभिधानसम्पदं
क्रमेण गङ्गां परिपृच्छतः किल ॥ १ ॥

पृष्टा पुनः सा प्रतिबोधशालिनी
पदे पदेऽप्यङ्गुतरम्यधामकम् ।
प्रदर्शयन्ती पथि खेदमेतयो
र्निरासयन्ती व्रजतोन्द्रमन्दिरम् ॥ २ ॥

तथा वदेत् सा प्रणिधानतोऽधुना
न दृश्यतेऽस्माद्वसुधा महत्यपि ।
यथा क्षितिर्नैवपथात्तिरोहिता
प्रतर्कये त्वम्बनसोऽपि तादृशो ॥ ३ ॥

जवाप्रसूनारुणभानुमान् करै
राशावधूनां तिमिरावगुण्ठनम्।
सलीलमुन्मुच्य शुभानि सादरं
मालोक्यतां तद्वदनानि चुम्बति ॥ ४ ॥

तत्तापसन्तापमपासितु करै-
रिवामृताध्मारवगाहते विधौ।
अहो सुधास्पृष्टजनस्य मज्वरः
कुतोऽन्यसन्तापमर्पेति यः पुनः ॥ ५ ॥

सुधाकरं पश्य सुधामयं तथा
क्षीरोद-शुद्धाम्बु-विधौत-विग्रहम्।
विलोक्य यं निर्म्मल-सौम्य-सुन्दरं
भवो विधत्ते शिरसा शिरोमणिम् ॥ ६ ॥

अयं सुधाविन्दुविमिश्रकौमुदी-
करैर्नरान् स्नेहयते सखीनिव।
सतां हि हिंसादिभिरक्षताम्मनां
विराजते द्वेष्यजनो न कुत्रचित् ॥ ७ ॥

पुरा धरायां युवयोर्निषण्णयो:
सुदूरमासीत् किल मङ्गलग्रह: ।
अहो ममत्वं शतविद्युताकृति:
विभासयन्नम्बरमद्य भासते ॥ ८ ॥

विलोहितेऽस्मिन् द्रुमजन्तवोऽपि च
स्वभावरक्ता: प्रतिभान्ति पश्यतम् ।
दुग्ध्वा धरित्रीं प्रतिमूर्त्तरक्तिम-
भागेन चैनं विधिरत्र निर्म्ममे ॥ ९ ॥

विलोकयेथां बुधमिन्दुसम्भवं
सदा नराणां हितकारिणं गुणै: ।
सदन्ववायो जनयेद्धि सज्जनं
नहि प्रसूते स कदापि निन्दितम् ॥ १० ॥

अयं पुन: पण्डितमण्डलालय:
सुवर्णवर्णो बृहतांपतिर्गुरु: ।
अतैव भाषा प्रथमं परिस्फुटा
शनै:शनैर्भूतलमागताभवत् ॥ ११ ॥

एतत्पदप्रक्षालननीरमिश्रिता:
पतन्ति नूनं भुवि हेमबिन्दव: ।
तानेव मर्त्त्या बहुमानपूर्व्वकं
लब्धुं यतन्ते धनबोधलाञ्छिता: ॥ १२ ॥

सम्पश्यतं शुक्रमथाम्बरे क्वचित्
सम्पिण्डितं वा तपसां फलं सितम् ।
सुरारिवृन्दाश्रितपादपङ्कजं
कृतं कवित्वप्रभयेव वेधसा ॥ १३ ॥

प्रभाकरान्ते स्थिरनीरदच्छवि:
विभासतेऽयं गणदेवभुण्डहृत् ।
परार्थमादाय कलङ्कमेचक:
घनोऽभवद्वा रवि-रश्मि-सञ्चय: ॥ १४ ॥

ततो गणेशानन-संहृतं रयं
क्रुतीति गीत: सुफलं ददात्यपि ।
सिद्धिं गतायान्तु कलङ्कसंश्रुतौ
कुतो यशस्तस्य सुकर्म्मसम्भवम् ॥ १५ ॥

निपीय पीयूषमपीन्दुभास्करौ
अमर्त्यलोकेऽयमग्रिमग्रहः ।
अहो सुधापि प्रतिकूलदैवतः
बुभुक्षुदुःखं प्रतिकर्त्तुमक्षमा ॥ १६ ॥

विभाति योऽयमपास्तमस्तकः
केतुग्रहोऽमङ्गलमेव मूर्त्तिमत् ।
सतां पदव्यां कथमप्युपागतः
दुरात्मतां किं विजहाति दुर्ज्जनः ॥ १७ ॥

इमं पुनः सर्व्वमनुक्रमाश्रमं
ध्रुवोऽधिशेते जनकाङ्कनिष्कृतः ।
ततो ध्रुवो लोक इति प्रगीयते
उक्तिर्हि मातुः परुषापि हृदये ॥ १८ ॥

निरीक्ष्यतां धातुरपूर्व्व दक्षता
यथान्तरीक्षे ग्रहराशिसंस्थितिः ।
कणाप्यमूष्याः प्रतिभासितात्मनि
मनोमलः छिद्यति दुष्कृतामपि ॥ १९ ॥

असंख्यलोका ननु पृष्ठतः कृता
अदूरमस्माकमितोऽमरावती ।
मन्दारगन्धः पवनोऽयमागतः
यतोऽत्र नः संहयति प्रतर्पयन् ॥ २० ॥

विचित्रवर्णाकृतयोऽग्रसंस्थिती
पतत्पताकाः कथयेयुरापत ।
प्रतर्कये किं लभते दिवि स्थितः
निर्जीवभावोऽपि सजीवसम्पदम् ॥ २१ ॥

उत्थाप्य पाणीनथवा दिवौकसः
प्रयातुमस्मांस्त्वरयन्ति सन्निधिम ।
सतां हि सद्भिः परिमिलनं भवे
दतुल्यमानन्दपदं निरामयम् ॥ २२ ॥

तथा कथञ्चित् प्रणिधानतोऽग्रतः
विलोक्यते तोरण एव दैवतः ।
कथं बलाकावलिवेष्टितोऽन्यथा
वियद्विभागः स्थिर एव भासते ॥ २३ ॥

निरीक्ष्यतां तोरणवर्त्ममागताः
पश्यन्ति चास्मांस्तृषिता इवामराः।
तमेव मन्तं कथयन्ति पण्डिताः
निरीक्ष्य यमुष्यति सज्जनोन्नतिम्॥ २४॥

मन्दारमालाभरलोलपाणयः
मन्दारमालाकृतभूषणास्तथा।
मन्दारमालास्पृहणीयदर्शना:
सुराङ्गनाः प्रस्फुटिता लता इव॥ २५॥

अवाकिरन्त्यः कुसुमैन मूर्द्धसु
संसारसंग्रामजयादुपागतौ।
मन्ये युवां पुष्पमरूपमायुषा
प्रेम्णैव नूनं सपर्यन्ति देवताः॥ २६॥ *

अदृष्टपूर्व्वातिथिलाभनन्दिताः
माङ्गल्यसङ्गीतनिविष्टमानसाः।
तथा पिबन्तो नयनैर्युवामिह
मूर्त्ताः प्रमोदा इव भान्ति सर्व्वथा॥ २७॥

* इति युगलकम्।

तमेव तासां करचुम्बितस्रजं
पविवा सहोपेत्य गृहाण मानद !
यतो नमस्कारपदं हि देवता
स्नेहः पुनर्भक्तिभिरेव वर्द्धते ॥ २८ ॥

स्नेहस्तथा प्रेम चिराय सौहृद
मेतद्धनेनैव यशस्विनोऽमराः ।
अन्यच्च यद्याति विहारयोग्यतां
सर्व्वे पुनस्तत्र समान-शक्तयः ॥ २९ ॥

पीयूषदस्मान् व्यथयन्ति न क्षुधाः
दरिद्रतास्माहरातिदूरवर्त्तिनी ।
हिंसाक्षुधादिप्रभवा च शत्रुता
चिरं निरस्ता त्रिदिवात्परस्परम् ॥ ३० ॥

अदुःखसंभिन्नसुखास्पदं ततः
प्रवेष्टुमर्हौ वहुबन्धुसङ्कुलम् ।
अतश्चिरं मा कुरुतं युवामिह
तथा निवर्त्तेऽहमपि स्वधामनि ॥ ३१ ॥

सरिद्वरायाः अवधाय भाषितं
कृतप्रवेशौ दिवि दम्पती सुरैः ।
सुराङ्गनाभिः परिवेष्टितौ तथा
सुरेन्द्रमादावुपतिष्ठतो ध्रुवम् ॥ ३२ ॥

समागतौ ताववलोक्य सोऽपि च
प्रमोदवेगात् परिहाय विष्टरम् ।
सहस्रनेत्रैस्तृषया पिबन्निव
गृह्णाति तौ सत्कृतिभिः समर्च्चयन् ॥३३ ।

ततो मरुत्वान् कृतविश्रमौ तु तौ
शनैः शनैर्बोधयते निजास्पदम् ।
इतो वसन्तः कुशलेन सर्व्वथा
विषादवार्त्तां न विदन्ति कर्हिचित् ॥३४ ।

तमिस्रमस्मिन्नवधूय भास्करो
न देवतापाय कदापि कल्पते ।
स्थाने पुनस्तीक्ष्णतरोऽपि चण्डतां
विहाय नूनं भजतेऽतिमार्द्दवम् ॥ ३५ ॥

दौर्गन्ध्यदारुण्यमपास्य मारुतः
सुगन्धसुस्पर्शतयातिमोहनः ।
चिरप्ररूढ़प्रणयेन वा सुरान्
मुहुर्मुहुः श्लिष्यति बान्धवानिव ॥ २६ ॥

न देवदेहे न च देवमन्दिरे
मालिन्यमास्ते न सुरः पिपासति ।
अतः सुखस्पर्शतयाम्बु केवलं
दिवौकसां याति विहारयोग्यताम् ॥२७

विभासयन्नेव विभासते दिवि
बिभर्त्ति शक्तिं दहनो न दाहिकाम् ।
निरस्य दोषान् गुणमात्रधारिणो
व्रजन्ति भावाः सुरकर्म्मयोगिताम् ॥२८॥

सम्मीकृतास्मिन् प्रतिवस्तुसंस्थिता
सदा नवीभूय ददाति सम्मदम् ।
यत्नैव नैवं विनिपात्यतेऽमरैः
पतिःप्रियाङ्गेष्विव तत्र लीयते ॥ २९ ॥

तथा विभिन्नाततयोऽपि निर्ज्जरा:
व्रजन्ति केचिन्न कुतोऽपि हीनताम् ।
प्रत्येकशो लोचनतर्पिमूर्त्तय:
देवत्वमेषां कथयन्ति सर्व्वथा ॥ ४० ॥

समीरमार्गेण तथांशुवर्त्मभि:
यथासुखन्ते विचरन्ति पुष्करे ।
यतोऽमराणां तरसा मनांस्यपि
न तानतीत्योत्क्रमितु क्षमाणि वा ॥४१॥

सुकर्म्मसज्जे निलये गतस्पृहा:
सदा क्षमन्ते भ्रमितुन्तएव हि ।
एकत्र नेते विषयानुरागिणा
मनिर्वृतेऽन्यत्र कथं प्रगच्छत: ॥ ४२ ॥

रम्याणि वस्तून्यथवा दिवौकसां
मनो न कर्षन्ति परस्व-शङ्कया ।
स्वरूपपुष्पाञ्जलिमेव केवलं
यच्छन्ति हंसैश्र निकषावतस्तुषे ॥ ४३ ॥

मणिप्रभासारमयैः समाधिभि-
र्हृदैव धाता विबुधान् विनिर्ममे।
अतो विभावेगविवेकिनोऽमराः
कार्य्येषु तद्धेतुगुणा विशन्ति हि ॥ ४४ ॥

मणिप्रभोद्दीपितमण्डपे क्वचित्
विचित्रनेपथ्यधरामराङ्गनाः।
विलाससङ्गीतमुपासतेऽथवा
श्रवोनिपेयामृतमुद्वमन्ति किम् ॥ ४५ ॥

तथेक्ष्यतामप्सरसोऽपि कुत्रचि-
ल्लीलाङ्गहारैः सुमनोमनांस्यपि।
आकृष्य लावण्य-तरङ्ग-सङ्कुले
निमज्जयन्ते निज-रूप-सागरे ॥ ४६ ॥

सौन्दर्य्य-पीयूष-पिपासवेऽथवा
यच्छन्ति लावण्यसुधोपढौकनम्।
न हि स्वरूपं स्वयमेव योषितः
विलोक्य तुष्यन्ति विनान्यदर्शिभिः ॥ ४७॥

विहाय चैतत् रमणीयनन्दनं
विलोक्यतां सम्प्रति मुग्धमन्मथम् ।
मनः प्रमथ्याप स मन्मथाभिधा
मिदं पुनस्तन्मथनं विभासते ।। ४८ ।

प्रसूनहासैर्विटपाङ्गचालितैः
पतत्रिणां कूजितमन्द्रभाषितैः ।
विलोकितुं प्रार्थयते हि तान्स्वयं
स्वदृष्टिलक्ष्मिं नहि यान्ति शोभिनः ।।४९।।

अनन्तरत्नं हृदयेऽस्य विद्यते
परोपकारे लघुता कुतो भवेत् ।
षड्रत्नमेविषयाणि धारय
दिदं पुनस्तपयते समागतान् । ५० ।।

यथासुखं नन्दनकानने वय
मलं भवामो भ्रमितुं समन्ततः ।
अहो पुरो भासुररत्नसञ्चयैः
प्रान्तावनद्धोपलवर्त्म वर्त्तते ।। ५१ ।।

तत्पार्श्वसंन्यस्तविफुल्लस्तवका:
सुगन्धमन्दानिलवेगदोलिता: ।
प्रसार्य्य शाखाभुजकान् विलोकयतां
नमन्ति चास्मानतिथीनिवागतान् ॥५२॥

तत: क्रमाद्दद्धितफुल्लविग्रहा:
प्रफुल्लपुष्पस्तवकाग्रपाणय: ।
मधुप्रलोभागतभृङ्गगुञ्जनै:
स्तुवन्ति तावत्तरव: ससम्भ्रमम् ॥ ५३ ॥

अवाध-सञ्चार-सुलभ-चेतसां
तथा सुधास्वादुफलोपसेविनाम् ।
सुखानि नूनं वदनात् पतत्रिणां
सङ्गीतरूपेण गलन्ति सर्व्वदा ॥ ५४ ॥

प्रसूनकान्तिर्भुवने विलोकिता
दिनान्तरे म्लानतयोपयोगिनी ।
प्रफुल्लभावात् परिणामदुर्द्दशा
न विद्यते वस्तुषु निर्झरेष्वपि ॥ ५५ ॥

सन्तानकोऽस्मिन्नभिलाषपूरणैः
समृद्धसन्तान इवोपतिष्ठति ।
अभावमेतर्हि निरस्य दुर्गतौ
भावोहि सर्व्वाभ्युदयेन वर्त्तते ॥ ५६ ॥

एवं सुखैरम्यतरेऽत्र धामनि
चिराय वासो भवतेऽभिरोचताम् ।
तथात्र भावास्तु तवेन्द्रियाणि च
प्रमोदयन्तो ददतां सुसम्पदम् ॥ ५७ ॥

श्रुत्वैव मैन्द्रं वचनं जितेन्द्रियः
भूदेवदेवो ननु भाषते शनैः ।
आज्ञापितं यद्भवतात्मतृप्तना
तदेव मे स्वीकरणीयमादरात् ॥ ५८ ॥

भवे समस्तेन्द्रियतृप्तिसाधने
स्तृप्तस्य भावो हि ममेऽद्य रोचते ।
चिराय शान्तिर्ननु येन लभ्यते
त्वयोपपन्नस्य तथा विधीयताम् ॥ ५९ ॥

श्रुतं मया प्राक् नहुषाभिधो नृपः
सुरेन्द्रसाम्राज्यमवाप्यकालतः ।
सुखोपभोगोरगपीतसौकृतः
भुजङ्गरूपेण पपात दुर्गतौ ॥ ६० ॥

तथा भवन्तोऽपि दितिप्रसूतिभि
रुद्देजिताः क्लेशमुपागमन् पुरा ।
अतो भवत्प्रार्थनवैमुखे मयि
समैव ते योग्यतरेति बान्धव !! ६१ ॥

एवं वचस्तस्य निशम्य वासवः
भूदेव-सद्भाव-विबोध-हर्षितः ।
अनन्त-सम्भार-विराग-वैमुखं
वक्तुं पुनः प्रक्रमते प्रियातिथिम् ॥ ६२ ॥

समर्पयंस्तत्र फलानि कर्म्मणां
त्वयैव कर्म्माचरितं भवेऽधुना ।
यतो भवे येन जनो निबध्यते
तेनैव मुक्तोऽसि चिराय कर्म्मणा ॥ ६३ ॥

तद्ब्रह्मसम्मेलनं मा मुमिच्छत
आतिथ्यसिद्धै परिकल्पयामि किम् ।
वैराग्य-पीयूष-सुतृप्त-चेतसे
सुधा सुधा स्यात् किमुतान्यवस्तुभिः ॥ ६४ ॥

त्वमुत्तरस्यान्दिशि प्रस्थितोऽधुना
नत्वा विधिं प्रार्थितसिद्धिमाप्नुहि ।
शिवस्य पन्था अनुकूल-मारुतः
प्रसन्नतान्ते विदधातु सर्व्वथा ॥ ६५ ॥

इति श्रीमन्महेन्द्रविरचिते भूदेवनिर्व्वाणकाव्ये
दिवोपस्थानं नाम पञ्चमः सर्गः ।

षष्ठः सर्गः ।

अथाभिवन्द्येन्द्र मुपात्तपद्धतिः
मन्दारगन्धानिलवीजित स्तथा ।
पितामहाध्यासपवित्र माश्रमं
गन्तुं पुनःप्रक्रमते स कान्तया ॥ १ ॥

अपाप-संविद्ध-पथेन सञ्चरन्
न लिप्यतेऽसावगुनापि पाप्मनाम् ।
सतां हि सद्वर्त्तभिरेव गच्छतां
कलङ्कपङ्काङ्कितता कुतो भवेत् ?? २ ॥

अभौममार्गेण विनाङ्गकर्म्मभिः
संकल्पकपाद्युगयान माश्रितः ।
व्रजन् पुनः पार्थिव-वाष्प-यानके
उपेक्षते पश्चिमग्निल्पिगौरवम् ॥ ३ ॥

तथा स्वपत्न्यैर नववर्त्मसौष्टवं
सन्दर्शयन्यातिविधात्मसंस्थितिम् ।
पाथेयसन्देश मतीवशर्म्मदं
विज्ञापयन् विज्ञ इवाग्रतोऽथवा ॥ ४ ॥

च्युताः पुनर्ब्रह्ममुखाद्धि वाड़वा
व्रजन्ति शुद्धा स्तपसा तमेव हि ।
यथा क्षितेः सूर्य्यकरावलम्बनैः
पूर्व्वाश्रयं मेघ मिवाम्बुबिन्दवः ॥ ५ ॥

पश्य प्रभोर्द्धामितवर्त्मनि प्रिये
पुण्योज्जला यान्ति तपस्विनो विधिम् ।
अहो तमोऽपास्य चिराय दुर्गतौ
तेजः पुन स्तेजस माप्नुते ध्रुवम् ॥ ६ ॥

आवां तथानेकदिनानि भूतले
नीत्वा कथं वा सुकृतोदयात् पुनः ।
यदाननाज्जाज्वलितावभूव हि
द्रष्टुं तमेवाशु समीपमाप्नुवः ॥ ७ ॥

अहो क्रमाद्ब्रह्मसरोऽवलोक्यते
सदाप्रफुल्लाम्बुजराजिराजितम् ।
चितं द्विरेफै र्मकरन्दसंग्रह-
मिषेण पुष्पाण्यथ शिष्यर्द्धिरोम् ॥ ८ ॥

कलं क्वणद्भि र्विमकाण्डसञ्चय--
श्रमोपशान्त्यै निजपक्षसंम्पुटम् ।
प्रसारयद्भिः वचसोपलक्षितैः
प्रपुण्डरीकै रिव भासितं तथा ॥ ९ ॥

तद्राजहंसावलिमध्यसंस्थिता
वृहद्गण्डरक्ताम्बुजरम्यविष्टरे ।
गृहीतपद्मासनमङ्गसङ्गिना
विरञ्जयन्तं जलमात्मरोचिषा ॥ १० ॥

ताम्रोदरे वामकराम्बुजे चिर
मविस्फुटाम्भोजनिभं कमण्डलुम् ।
समुद्वहन्तं भवबीजपूरितं
तन्वन्तमम्भोजमनम्बुसम्भवम् ॥ ११ ॥

तन्नाभिपद्ममध्यात् कुशसङ्गकर्म्मणा
प्रगृह्य भूबीजलवं निरन्तरम् ।
निमेषमात्रेण भवं नवं नवं
सृजन्तमम्भोधिमहीध्रराजितम् ॥ १२ ॥

भुवो भवायैव तदङ्गसम्भवैः
तदर्च्चनाक्षालितपापबिन्दुभिः ।
तपःफलैरेव च समधागतैः
संस्तूयमानं मुनिभिः समन्ततः ॥ १३ ॥

चतुर्मुखेभ्यश्च चतुःस्वरूपिनीं
रक्ताम्बुजेभ्यः सितपद्मसन्निभाम् ।
वानीं वमन्तं जगतां गुरुं प्रिये
चतुर्मुखं वीक्ष्य मुदं समाप्नुहि ॥ १४ ॥*

तदेहि तूर्णं वयमद्य वेधसं
स्तवैः स्तुवन्तः प्रतिबोधयामहे ।
तथाविधानां हि कृपावलोकितं
प्रसूयतेऽस्मत्सदृशेषु सत्फलम् ॥ १५ ॥

इति कुलकम् ।

तदन्तरं तौ विनयेन दम्पती
कृताञ्जलीभूय पितामहान्तिकम् ।
प्रगच्छतो दर्शनजन्यशर्म्मभिः
अङ्गीकृतावञ्चयेन सर्व्वथा ॥ १६ ॥

तावापतन्तौ चरणाय विश्वसृड्
विलोक्य गृह्णाति विशेष माहृतः ।
तथाविधानां हि तथाविधादरः
शमोत्तमस्थानतयातिशोभते ॥ १७ ॥

एह्येहि भूदेव जगज्जयेन ते
प्रसन्नमास्यं परिलोक्य साम्प्रतम् ।
प्रमोद माप्नोमि चिराय पुत्रक !
तनोति मे शर्म्म सतां समुन्नतिः ॥ १८ ॥

अदृष्टदोषात् कलिशासनेऽधुना
भवाय ये यान्ति कलङ्कमुक्तये ।
अहो दुरन्तेन्द्रियजालसन्दिताः
प्रायोऽवसीदन्ति हि ते कलङ्किनः ॥ १९ ॥

भविष्यति सम्प्रति तादृशो नृपो
विनीय धर्म्मं कृतराज्यशासनः ।
निरीक्ष्य यः पापमभावनिर्णयं
विद्याद् वृथैवाखिलदण्डशास्त्रकम् ॥ २० ॥

न तादृशाः सन्ति पुरोधसः क्वचित्
मदाजगन्मङ्गलहेतुचिन्तनाः ।
प्रबोधनेत्राणि निमीलितानि ये
उन्मेषयन्ते चिरनिद्रितात्मनाम् ॥ २१ ॥

न ते तपस्यापरिपूतविग्रहाः
वशिष्ठ-वाल्मीकि-पराशरादयः ।
गायन्ति सामानि दहन्ति पावके
पापानि शाक हविषेव सर्व्वदा ॥ २२ ॥

तपोवनं नाम न विद्यतेऽधुना
संसारदुःखानलतापविह्वलाः ।
प्रव्रज्य गेहादुपशान्तचेतसा
स्मरन्ति यस्मिन् परमात्मसंज्ञितम् ॥ २३ ॥

कौटिल्यजालैरघवाड़वाग्निभि
र्दुरुत्तरोऽयं विषयोर्म्मिसङ्कुलः।
त्वया भवाब्धिर्ननु गोष्पदीकृतो
धन्योऽसि भूदेव! कृतात्मसद्गतिः॥ २४॥

प्रफुल्लपाथोरुहराजिराजिते
वेदानुवादं कलहंसनादिते।
ममाश्रमे चेन्ननुमे सुखाय ते
वाणीविपञ्च्युत्थितनिस्वनामृतम्॥ २५॥

उदात्तमिश्रै स्वरवानुदात्तकैः
सप्तर्षिवक्त्रादुद्गलिता सरस्वती।
कटूक्ति-संसार-विरक्त-चेतसे
सुधेव तुभ्यं श्रवणेऽभिरोचताम्॥ २६॥

एकान्तशान्ते रुचिरे मदाश्रमे
सप्तर्षिसङ्गेन यथाष्टमो मुनिः।
सश्लोकतो येन सुधा निराकृता
तत् साम गायन् प्रतिवस्तुमर्हति॥ २७॥

यथैव मुक्ता विरते पितामहे
उदारनम्रोक्तिभि रात्मसम्भवम् ।
सम्भावयन्नारभतेऽभिभाषितु
भूदेवदेवोऽपि निरस्तचापलः ॥ २८ ॥

उवाच यन्मय्यनुकम्पया भवां
स्त्रिलोकबन्धो ! तव युक्तमेव तत् ।
तवोपकण्ठे प्रणयोपलालित-
जनस्य भीति र्न कुतोऽपि विद्यते ॥ २९ ॥

तथापि तद्भक्तिपराङ्मुखो यदि
मनुष्यवुद्ध्या प्रतिकूलतां भजे ।
अहो यदब्धेः परपार मागतः
पुनर्नियोक्ष्ये तरणे तदम्बुधेः ॥ ३० ॥

हे तात हे देव विधानपण्डित
विधेहि मे शाश्वतनिर्वृतिं विभो !
वृथाधरारण्यतले परिभ्रमन्
ममान्तरात्मोत्सहते न कुत्रचित् ॥ ३१ ॥

निवेद्य चैवं विनयेन वेधसे
प्रत्युत्तराशाकुलसाश्रुलोचनः ।
प्रभातवातस्फुरिताकणाम्बुज-
निभं विधातुर्वदनं निरीक्षते ॥ ३२ ॥

आश्वासयन् सोऽपि सुधाकरोपमो
वचोमृतप्रार्थिचकोरसन्निभम् ।
ब्रवीति तद्भाव-विबोध-हर्षितः
प्रेम्णा द्रवीभूय हितार्थसाधनम् ॥ ३३ ॥

गृहाण सारं गलितस्य मद्‌हृदः
ओङ्काररूपं परमार्थसाधनम् ।
गायन् जपन्नेतदुपेन्द्रमादृतः
यथेप्सितं धामनि गन्तुमर्हसि ॥ ३४ ॥

इति श्रीमन्महेन्द्रविरचिते भूदेवनिर्व्वाणकाव्ये
ब्रह्मसन्दर्शनं नाम षष्ठः सर्गः ।

———

सप्तमः सर्गः ।

एवं विधातारमुपास्य भार्य्यया
गृहीतमोङ्कारमनारतं स्मरन् ।
सज्ज्ञानसन्दर्शितसत्पथाश्रितः
प्रयाति वैकुण्ठमकुण्ठसङ्गतिम् ॥ १ ॥

ओङ्कारमाकर्ण्य जयस्तथापरः
ससम्भ्रमं द्वारमपास्य तिष्ठति ।
तपोधनेषु प्रतिकूलचारिता
जानाति नूनं प्रलयङ्करी भवेत् ॥ २ ॥

गृहं प्रविष्टेन विमुक्ततोरणं
न दुर्लभस्तेन रमेशसन्निधिः ।
तमत्र विष्णुं विभुदर्शनस्पृहा
अन्धं नयन्त्यर्थमिवात्मयष्टिका: ॥ ३ ॥

श्रीं देव श्रीं केशव सूक्ष्मविग्रहः
सिसृक्षया विश्वमपूर्व्वकौशलैः ।
धराविनाशावसिताम्बुमातके
त्वमेव शेषः प्रलये बभूविथ ॥ ४ ॥

नाभिप्ररूढ़ाम्बुजसम्भवं विधिं
संरक्षितुं तत्स्तुतिभिः प्रबोधितः ।
त्वमेव सर्गप्रतिकूलचारिणौ
हणाय मत्वा मधुकैटभावहन् ॥ ५ ॥

मग्नां पुनः शूकररूपमाश्रितो
दधर्थ पृथ्वीं दशनैकलीलया ।
अहो प्रतिष्ठां प्रगता दयैव ते
वराहरूपेण ररक्ष मेदिनीम् ॥ ६ ॥

भवे नरो मां यदि विस्मृतो भवेत्
नूनं विपद्येत वृथार्थचिन्तया ।
तदेव वेदं निज-तत्व-बोधकं
मरक्षयः पाथसि मीनरूपधृक् ॥ ७ ॥

युगे युगे हीनतनू विधारयन्
जगज्जनान् पालयसेऽनुकम्पया।
भवाद्दशानाम् प्रतिपालनो क्रिया
दीने समृद्धे च न भेदमाप्नुते ॥ ८ ॥

त्वमेव देवो रविमण्डलस्थितो
निरन्तरं शोषयसेंऽशुजालकैः।
तथाविधः शोषणनिग्रहोऽपि ते
भवेषु सहर्षफलाय कल्पते ॥ ९ ॥

तवप्रभाभासितचन्द्रमण्डलः
प्रेम्णा द्रवीभूय पितेव सन्ततः।
सुधामयैः स्निग्धकरैः परामृशन्
प्रत्येकमङ्गं जगतोऽवतर्पते ॥ १० ॥

तस्माद्भवन्तं सितपुष्पमालिनं
रमासमुद्भासितनीलविग्रहम्।
काले बलाकाभि रिवोपसेवितं
नमामि विद्युद्वलिताम्बुवाहकम् ॥ ११ ॥

सदा सतो व्यापदि योऽभिपालयन्
नियम्य नित्यं कुपथाद् दुरात्मन: ।
प्रकाशयेद्धर्म्म मधर्म्म-निर्गत
नमामि तं सत्वगुणाश्रयं विभुम् ॥ १२ ॥

सुवन्तमेवम् भुवनादुपागतं
पत्नीद्वितीयं विनयान्नमस्कृतम् ।
सदाप्रसन्नेन निरीक्ष्य तं द्विजं
नवावतारं सुखमेव लभ्यते ॥ १३ ॥

तथा विभु: स्नेहसुकोमलाक्षरै:
भूदेवमादौ शिवमेव पृच्छति ।
समस्ततत्त्वार्थविदान्तु तत्क्रिया
महाजनाचारतयैव वर्त्तते ॥ १४ ॥

आगच्छ भूदेव किमत्र लज्जसे
मन्मन्दिरं त्वद्‌गृहमेव भावय ।
तपोभिलब्धे परकीयसद्मनि
विशुद्धबुद्धि: प्रणयाद् गरीयति ॥ १५ ॥

निरन्तरं ब्रह्म तपस्यतस्तव
समागमं श्लाघ्यतरं हि मन्महे ।
न केवलात्स्वतसुकृतोदयादयं
स्थितस्य पुण्येन भवद्विधागमः ॥ १६ ॥

सत्याश्रयस्त्वं मम सत्यसंश्रये
विघोषयन् सत्यजितं हि सर्व्वदा ।
यत्सत्यमाश्रित्य विकुण्ठमागतः
सेवस्व भूदेव तदेव सन्ततम् ॥ १७ ॥

धरातलश्रीरपि न श्रियं सतां
सर्व्वात्मना पुष्यति चञ्चला सती ।
सेयं रमास्मिन् रमतेऽचला सती
प्रपूर्य्य कामान् कमनीयवस्तुभिः ॥ १८ ॥

यावन्न दृष्टिः पुरतोऽभिवर्त्तते
रुणद्धि तावच्चिदशं मनोरथः ।
उन्मील्य नेत्रं परिवीक्षितेऽयतः
करप्रचेयाः खलु सर्व्वसम्पदः ॥ १९ ॥

न सृष्टिलीला न च संहृतिक्रम:
सविक्रमं मङ्गवनेऽभिवर्त्तते ।
मतो न नाशो नहि सम्भव: कचि-
द्विलोकितो दर्शनतत्त्वदर्शिभि: ॥ २० ॥

निकेतनेऽस्मिन् ममरूपमागतो
मत्तुल्यसौख्येन निवस्तुमर्हसि ।
इतो वसन्तो न सुखैर्मया सह
विभेदिता: केवलमेव विक्रमै: ॥ २१ ॥

इति प्रसन्नेन निपन्नसन्निके
भट्टदेवमाज्ञाय विमौनिना स्थितम् ।
प्रपूज्य पूजाकुशलोऽपि सद्विज:
तमिन्दिरावन्दितमाह सादरम् ॥ २२ ॥

यदात्थ मह्यं प्रणयार्द्रचेतसा
त्वय्येव तादृक् करुणाऽभिशोभते ।
तदन्यथा देव समागतार्थिने
निजास्पदं क: परिदातुमर्हति ?? २३ ॥

महात्मनां वा करुणा महत्तरा
गलन्ति निःशेषमुपागतार्थिषु ।
पयोधराणामिव वारिदागमे
कीलालधारा धरणीषु निर्गताः ॥ २४ ॥

जानामि ते धामनि दुःखसम्भवो
न सम्भवेद्देव ! तथापि भूतले ।
सुखं सदास्वाद्य तु दुखमिश्रितं
सुखाच्च मे धावति शान्तयेऽन्तरम् ॥२५॥

अतो भवद्भक्तजने दयाधन !
विधीयतां शान्ति रनन्तसङ्गतिः ।
भवादृशः प्रार्थिजनेऽनुकम्पया
याच्ञानुरूपार्थितमेव सूयते ॥ २६ ॥

इत्येव मुक्त्या परितोषितोऽच्युतः
दयाद्रवो वर्षति भाषितामृतम् ।
प्रयाहि शङ्कां परिहाय शङ्करं
गायन् ववम् वम् शिव सर्व्वशङ्कर ॥ २७ ॥

प्रगृह्य पद्मामपि कल्पवल्लरीं
विकल्पहानिं विनयेन यावत ।
न तादृशे भक्तिधने महत्तरा:
निषेधशल्यं व्यवहर्त्तु मीशते ॥ ३० ॥

इत्थं पुनर्भक्तितरीमुपाश्रित:
सदानुकूलस्तववातचालिताम् ।
दशाब्धिकल्पा दशमाह्रकापुरी
रतीत्य निर्व्वाणतटी मुपैत्यसौ ॥ ३१ ॥

क्रमेण स श्रीफलमूलवासिनं
तत्पत्रवीथीरचितातपत्रकम् ।
मृगेन्द्रचर्म्म प्रकृते रुपागतं
वसान मैशासन मिन्दुभूषणम् ॥ ३२ ॥

मन्दाकिनी-शान्ति-निशान्त मुत्तम
नीलं जटाजाल मजस्रमंस्रवम ।
वहन्त माकाश मिवांशुपाण्डर
धाराभिवर्षन्त मशुभ्र मभ्रकम् ॥ ३३ ॥

शुभ्रं पुनः पीतहलाहलन्तथा
शुद्धं पुनः ज्ञानचरित्रदूषितम् ।
शिवं पुना रुद्रतयातिभीषणं
भवम् पुनः सम्भव-विघ्न-कारणम् ॥ २४ ॥

कृतान्त मप्यात्महितेन शङ्करं
सर्व्वज्ञमप्यज्ञचरित्र-चिह्नितम् ।
तथा विरूपाक्षमपीतिदर्शिन
मीशानमप्याशु-विनाश-दोच्चितम् ॥ २५ ॥

भूतेश्वरं वाखिल-भूत-विद्विष
विसृज्यमानैरपि भूतसञ्चयैः ।
तन्मात्रयोगै रतिमात्रयार्च्चित
मपि प्रसादा द्विरतम्प्रविन्दत ॥ २६ ॥ *

प्रतिद्रुमेभ्यः प्रतिवल्लित स्तथा
प्रसूनसारं भ्रमनः समाहरन् ।
मनःसरःस्वात्मपविचितोनिशं
संहाररुद्रं प्रशमाय सेवते ॥ २७ ॥

इति पञ्चभिः कुलकम् ॥

विहाय दाहात्मकभाव मात्मनो
ललाट-लीनो दहनोऽस्य धूर्ज्जटेः ।
तमोऽभिषङ्गाद्याति रोष उद्भवे
विरस्यते सन्ततमसन्ततोऽग्रतः ॥ ३८ ॥

तदुग्रभावोपशमाय जाह्नवी
पतिव्रता धर्म्ममपास्य दूरतः ।
कीलाललीलातरलाऽपि मौलिषु
गङ्गाधरप्रेम चिराय गायति ॥ ३९ ॥

क्षितिः प्रफुल्लद्रुमगुल्मभूषिता
विहङ्गनादै र्मृदुनर्म्मभाषिनी ।
जायेव सन्तानकृताङ्करोहणा
प्रीणाति कान्तं मृगबालखेलया ॥ ४० ॥

एवं स भावै रपि सर्व्वथाश्रितः
भूदेवभावं हरति स्वयं हरः ।
प्रसाद्यमानोऽपि न-साधुवृत्तिभिः
विभ्रंशतं नो करणीयतो बुधः ॥ ४१ ॥

यस्मिन् पुनस्तन्मयताधिगामिनि
न लिङ्गिनो तद्दयिताभिवर्त्तते।
एकस्तदात्मा प्रहितोऽत्र कर्म्मणे
संसारलीलाकृतये द्विधाभवत् ॥ ४२ ॥

पारावारे लवणसलिले लावणी पुत्तलीचेत्
स्नातुं मग्ना व्रजति न तथा ब्रह्म तद्गाहमान:।
ब्रह्मानन्दस्थगितमहिमा प्राकृतेभ्यो विमुक्त:
धन्योधन्योजयतिनियतंशाश्वतीशान्तिरास्ताम्॥४३

शान्ति: शान्ति: सुरभिपवनं याचते न प्रभाते
सुप्तोद्बुद्धो नहि खगरुतं श्रोतुमुत्कण्ठते वा।
स्मारं स्मारं परमपुरुषं भानुमुद्बोधितुं नो
भूदेवोऽद्य प्रसरति गृहाद्ब्रह्मभूयं प्रपन्न: ॥४४॥

इति श्रीमन्महेन्द्रविरचिते भूदेवनिर्व्वाणकाव्ये
निर्व्वाणं नाम अष्टम: सर्ग:।

सम्पूर्णम्।